चटकका, स्त्री, (चटका + स्वार्थे कन् । "उदीचामातः स्थाने यकपूर्व्वायाः ।" ७ । ३ । ४६ । इति पक्षे इदादेशाभावः ।) चटका । इति मुग्धबोधव्याकरणम् ॥

चटका, स्त्री, (चटक + टाप् ।) चटकपत्नी । (चटकस्य चटकाया वा स्त्र्यपत्यम् । चटका + ऐरक् । स्त्रियामपत्ये लुक् वक्तव्यः । तत्र टाबन्तात् तद्धिते लुप्ते "लुक् तद्धितलुकि ।"१।२।४९। इति टापो लुकि पुनः अजाद्यतष्टाप् । स च जातिलक्षणङीषो बाधकः ।) चटकस्यापत्यम् । चटी इति भाषा ॥ इत्यमरः । २ । ५ । १८ ॥ पिप्पलीमूलम् । इत्यमरटीकायां नारायणचक्रवर्त्ती ॥ श्यामापक्षी । इति राजनिर्घण्टः ॥

चटकाशिरः [स्] क्ली, (चटकायाः शिर इव ।) पिप्पलीमूलम् । इति हेमचन्द्रः ॥

चटकिका, स्त्री, (चटका + स्वार्थे कन् । "उदीचामातः स्थाने यकपूर्व्वायाः ।" ७ । ३ । ४६ । इति इदादेशः ।) चटका । इति मुग्धबोधव्याकरणम् ।

चटिका, स्त्री, (चटति भिनत्ति रोगादिकं नाशयतीत्यर्थः । चट् + बाहुलकात् इकन् ।) पिप्पलीमूलम् । (चटति भिनत्ति धान्यादिकं स्वचञ्चुपुटेनेति ।) चटका । इति हलायुधः ॥

चटिकाशिरः, [स्] क्ली, (चटिकायाः चटकपत्न्याः मस्तकमिव आकृतिरस्य ।) पिप्पलीमूलम् । इत्यमरः । २ । ९ । ११० ॥

चटिकाशिरः, पुं, ("सर्व्वे सान्ता अदन्ताः स्युः ।" इत्युक्तेः पृषोदरादित्वात् सलोपः ।) पिप्पलीमूलम् । इत्यमरटीकायां भरतः ॥ (अस्य पर्य्याया यथा, वैद्यकरत्नमालायाम् ।

"ग्रन्थिकं पिप्पलीमूलं षड्ग्रन्थिश्चटिकाशिरः ॥")

चटुः, पुं, (चटति शोकसन्तापादिकं भिनत्तीति । चट भेदे + "मृगय्वादयश्च ।" उणां । १ । ३७ । इति कुः ।) प्रियवाक्यम् । (यथा, माघे । ४ । ६ ।

"छायां निजस्त्रीचटुलालसानां
मदेन किञ्चित् चटुलालसानाम् ॥")

उदरम् । व्रतिनामासनभेदः । इति मेदिनी । टे । १४ ॥ प्रियभाषिणि क्लीवलिङ्गोऽपि । इति संक्षिप्तसारे उणादिवृत्तिः ॥

चटुलः, त्रि, (चटतीति । चट् + बाहुलकादुलच् । यद्वा, चटु + "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति मत्वर्थे लच् ।) चञ्चलः । इति हेमचन्द्रः । ६ । ८१ ॥ (यथा, रघुः । ९ । ५८ ।

"त्रासातिमात्रचटुलैः स्मरतः सुनेत्रैः
प्रौढप्रियानयनविभ्रमचेष्टितानि ॥")

सुन्दरः । इत्युणादिकोषः ॥

चटुला, स्त्री, (चटुल + "अजाद्यतष्टाप् ।" ४ । १ । ४ । इति टाप् ।) विद्युत् । इति जटाधरः ॥ (गायत्रीरूपा भगवती । यथा, देवीभागवते । १२ । ६ । ४७ ।

"चटुला चण्डिका चित्रा चित्रमाल्यविभूषिता ॥")

चटुलोलः, त्रि, (चटुलश्चञ्चलः लोलश्च । अतिचञ्चलत्वात्तथात्वम् । निपातनादलोपे साधुः ।) चाटुलोलः । सुचञ्चलः । इति हारावली ।२१६॥

चड, इ क रोषे । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट् ।) इ क, चण्डयति । इति दुर्गादासः ॥

चड, इ ङ रोषे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) इ, कर्म्मणि चण्ड्यते । ङ, चण्डते । इति दुर्गादासः ॥

चण, शब्दे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) चणति । इति दुर्गादासः ॥

चण, म दाने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) म, चणयति । इति दुर्गादासः ॥

चण, मि गतौ । हिंसे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) मि, चणयति चाणयति । इति दुर्गादासः ॥

चणकः, पुं, (चणति वेदोच्चारणादिध्वनिना शब्दायते इति । चण शब्दे + कुन् ।) मुनिविशेषः । इति शब्दरत्नावली ॥ (चण्यते दीयते इति । चण दाने + कुन् ।) शस्यविशेषः । चणा बुट छोला इति च भाषा ॥ तत्पर्य्यायः । हरिमन्थकः २ । इत्यमरः । २ । ९ । १८ ॥ हरिमन्थजः ३ । इति तट्टीका ॥ चणः ४ हरिमन्थः ५ सुगन्धः ६ कृष्णचञ्चुकः ७ बालभोज्यः ८ वाजिभक्ष्यः ९ कञ्चुकी १० । अस्य गुणाः । मधुरत्वम् । रूक्षत्वम् । मेहवान्त्यस्रपित्तनाशित्वम् । दीपनत्वम् । वर्णबलरुच्याध्मानकारित्वञ्च ॥*॥ आमस्य तस्य गुणाः । शीतलत्वम् । रुच्यत्वम् । सन्तर्पणत्वम् । दाहतृष्णाश्मरीशोषनाशित्वम् । गौल्यत्वम् । कषायत्वम् । इषत्कफवीर्य्यकारित्वञ्च ॥*॥ भृष्टस्य तस्य गुणाः । रुच्यत्वम् । वातनाशित्वम् । रक्तदोषकारित्वम् । उष्णवीर्य्यत्वम् । लघुत्वम् । स्वेदशैत्यहरत्वञ्च ॥ * ॥ तस्य यूषस्य गुणाः । मधुरत्वम् । कषायत्वम् । कफवातविकारश्वासोर्द्धकासक्षमपीनसनाशित्वम् । बलदीपनत्वञ्च ॥ * ॥ प्रातस्तज्जलपानगुणाः । चन्द्रमरीचिवत् शीतलत्वम् । पित्तरोगनाशित्वम् । पुष्टिप्रदत्वम् । पाके नैजगुणत्वम् । सन्तर्पणत्वम् । मञ्जुलत्वम् । मधुरत्वञ्च । इति राजनिर्घण्टः ॥*॥ तस्य आर्द्रभृष्टस्य गुणः । बलकारित्वम् । रोचनत्वञ्च ॥ * ॥ स्विन्नस्य तस्य गुणः । पित्तकफनाशित्वम् ॥ * ॥ तत्सूपः क्षोभकरः ॥ * ॥ तस्य शाकस्य गुणाः । रुच्यत्वम् । दुर्ज्जरत्वम् । कफवातकारित्वम् । अम्लत्वम् । विष्टम्भजनकत्वम् । पित्तदन्तशोथनाशित्वञ्च । इति भावप्रकाशः ॥

चणकात्मजः, पुं, (चणकस्य मुनिविशेषस्य आत्मजः ।) वात्स्यायनमुनिः । इति हेमचन्द्रः । ३ । ५१७ ॥

चणकाम्लकं, क्ली, (चणकजातमम्लम् । ततः स्वार्थे कन् ।) चणकलवणम् । तस्य गुणाः । अत्यम्लत्वम् । दीपनत्वम् । दन्तहर्षणत्वम् । लवणानुरसत्वम् । रुच्यत्वम् । शूलाजीर्णविबन्धनाशित्वञ्च । इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥

चणकाम्बवाः, [र्] क्ली, (चणकाम्लस्य चणकलवणस्य वाः जलम् ।) वेतसफलवच्चणकपत्रशिशिरवारि । इति रत्नावली ॥

चणद्रुमः, पुं, (चणश्चणक इव द्रुमो वृक्षः ।) क्षुद्रगोक्षुर इति राजनिर्घण्टः ॥ चणोद्रुमोऽपि पाठः ॥

चणपत्री, स्त्री, (चणश्चणकस्तस्य पत्रमिव पत्रं यस्याः । स्त्रियां ङीप् ।) रुदन्तीवृक्षः । इति राजनिर्घण्टः ॥

चणिका, स्त्री, (चणति दुग्धवद्रसं ददातीति । चण दाने + क्वुन् । टाप् अत इत्वञ्च ।) तृणविशेषः । तत्पर्य्यायः । गोदुग्धा २ सुनीला ३ चेतना ४ हिमा ५ । अस्या गुणाः । शैत्यम् । वृष्यत्वम् । बल्यत्वम् । अतिमधुरत्वञ्च । तृणैः पशुहितत्वम् । इति राजनिर्घण्टः ॥

चण्डं, क्ली, (चण्डते इति । चडि + पचाद्यच् ।) तीक्ष्णम् । इति शब्दरत्नावली ॥

चण्डः, पुं, (चणति चणयति वा अम्लरसं ददातीत्यर्थः । चण + "अमन्तात् डः ।"उणां ।१।११४। इति डः ।) तिन्तिडीवृक्षः । चण्डते कुप्यतीति । चडि + अच् ।) यमकिङ्करः । दैत्यविशेषः । इति मेदिनी । डे । ११ ॥ (अयं हि शुम्भासुरसेनानीः । कदाचिदयं हिमाचलस्थां भगवतीं दृष्ट्वा शुम्भाय कथितवान् । ततः शुम्भार्थं भगवतीमानयनाय गतोऽसौ तल्ललाटफलकनिर्गतया चामुण्डया निहतः । एतद्विवरणं मार्कण्डेयपुराणे द्रष्टव्यम् । कार्त्तिकेयः यथा, महाभारते । ३ । २३१ । ४ ।

"शिशुः शीघ्रः शुचिश्चण्डो दीप्तवर्णः शुभाननः ॥")

चण्डः, त्रि, (चण्डते रुष्टो भवतीति । चडि + पचाद्यच् ।) अत्यन्तकोपनः । इत्यमरः । ३ ।१।३२ ॥ (यथा, महाभारते । ३ । २३३ । ११ ।

"चण्डाश्च शौण्डाश्च महाशनाश्च
चौराश्च दुष्टाश्चपलाश्च वन्याः ॥")

तीक्ष्णतावविशिष्टः । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । ३२ । २३ ।

"दहन्तमिव तीक्ष्णांशुं चण्डवायुसमीरितम् ॥")

चण्डता, स्त्री, (चण्डस्य भावः । चण्ड + तल् ।) उग्रता । इति हेमचन्द्रः । २ । २३२ ॥

चण्डनायिका, स्त्री, (चण्डी कोपना नायिका ।) दुर्गा । इति शब्दरत्नावली ॥ अष्टनायिकान्तर्गतनायिकाविशेषः । (यथा,दुर्गाध्याने ।

"उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका ।
चण्डा चण्डवती चैव चामुण्डा चण्डिका तथा ॥
आभिः शक्तिभिरष्टाभिः सततं परिवेष्टिताम् ।
चिन्तयेत् सततं दुर्गां धर्म्मकामार्थमोक्षदाम् ॥")

तस्या ध्यानं यथा,देवीपुराणोक्तदुर्गोत्सवपद्धतौ ।

"चण्डनायिकां नीलवर्णां षोडशभुजाम् ।
कपालं खेटकं घण्टां दर्पणञ्च धनुर्ध्वजम् ।
पाशञ्च शोभनां शक्तिं वामहस्तेन बिभ्रतीम् ॥
मुद्गरं शूलवज्रञ्च खड्गञ्चैव तथाङ्कुशम् ।
शरं चक्रं शलाकाञ्च दक्षिणेन च बिभ्रतीम् ॥"

चण्डरुद्रिका, स्त्री, (चण्डः प्रचण्डः रुद्रः अधिष्ठातृतयाऽस्त्यस्याः । चण्डरुद्र + "अत इनिठनौ ।"